८

त॰ री॰ ॐ स्वस्तिश्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ नत्वा विश्वेश्वरं सांबं कृत्वा च गुरुवंदनं सिद्धांतकौमुदीव्याख्या क्रियते तत्त्व
१ बोधिनी १ विघ्नविघाताय कृतं मंगलं शिष्यशिक्षायै निबध्नन् चिकीर्षितं प्रतिजानीते मुनित्रयमित्यादिना त्रयो
वयवा यस्य त्रयं संख्याया अवयवे तयप् द्वित्रिभ्यां तयस्यायच् मंतारो वेदशास्त्रार्थतत्त्वावगंतारो मुनयः मनेरुच्चै
त्यौणादिकसूत्रेण मनेरिन् उकारो मनेः परः इत्प्रत्ययश्च गुणः स्कन्ते हि भवति किदित्यनुवर्त्तनात् उपरकरणाद्य
नेकं पाणिनिकात्यायनपतंजलीनां त्रयं मुनित्रयं ननु स्वयं सुवेन मस्कृत्यस्य त्रैवात्रापि नमः स्वस्तीत्यादिना
म॰ द॰ चतुर्थी स्यात् मैवं उपपदविभक्तेः कारकविभक्तिर्बलीयसीति वक्ष्यमाणत्वात् नमस्करोति देवानितिवत् द्वि
तीया याप्रवृत्तत्वात् किंच अहृत्स्वार्थावृत्तिरिति पक्षे नमः शब्दस्यात्र निरर्थकत्वात्तद्योगे चतुर्थी न भवति २
स्वार्थवद्ग्रहणपरिभाषायाः प्रवृत्तेः स्वयं नुवेन मस्कृत्यस्यत्र तु स्वयं नुवमनुकूलयितुमित्यर्थविवक्षायां क्रि
यार्थोपपदस्येत्यादिना चतुर्थी तिमन्तलए वस्फुटीभविष्यति नन्वेवं नमः स्वस्तीति सूत्रे नमः १ पदस्यार्थमिति श
क्यहरयेनमद्वृत्त्यत्र हरिमनुकूलयितुमित्याद्यविवक्षितेसे वधसामान्ये प्रस्थापायां तत्र [illegible] यवादतया
तस्यावश्यकत्वात् तदुक्तौ रितिभिर्भाष्यपाणिन्यादीनामुक्तीः सूत्रवार्त्तिकभाष्याणीत्यर्थः तस्य मुनित्रयस्योक्ति

रितिप्रारब्धानेपिमुनिसमुदायेन स्त्वंत्रवार्त्तिकं भाष्यं [redacted] वोक्तमितिसमुदायिनां मुनीनामभे
वोक्तीरितिपर्य्यवस्यति परिभाव्येतिपर्य्यालोच्येत्यर्थः नत्वपरिपूर्वकस्य भवतेस्तिरस्कारार्थत्वात्कथमत्रत्रा
नार्थतेतिशंकायां परीत्यस्य भावीतिचुरादिणिजंतेनयोगात् केचित्तुभवतिनायोगमभ्युपेयेत्याप्याहुः परोभुवोऽव
ज्ञानइतिसूत्रेपरोभुवइत्यस्यावज्ञानइतिविशेषणात्ततिरस्कारार्थत्वनियमः मनसापरिभाव्यकिंचिदित्यादि
त्व ५ प्रीहर्षादिप्रयोगश्च अतएवात्राप्रयुक्तदोषशंकापिनास्तीति अन्येत्ववताद्वरः परिभवः परिभावः तिरस्क्रियेति
कोशात्परिपूर्वकाद्भवतेर्घजंतादेवतिरस्कारप्रतीतिर्नान्यस्मादित्याशंकेवात्रनास्तीत्याहुस्तन्मंदंपरिभवपू
रिभवतीत्यतोपितिरस्कारप्रतीतेः वैयाकरणेति व्याकरणमधीयतेविदंतिवा वैयाकरणाः तत्सिद्धांतानांकौ
मुदीप्रकाशिकेत्यर्थः निर्दुष्टसकलजनाह्लादकत्वसाम्येनकौमुदीशब्दप्रयोगः करिष्यमाणायाऽपिकौमुद्याबुध्या
सन्निधायित्वादियमित्यंगुल्यानिर्देशः विरच्यतेमयेतिशेषः रचीप्रतिपत्नेप्रतियत्नोगुणाधानंविपूर्वादस्माद्व
र्त्तमानसामीप्येनविष्यदर्थेवर्त्तमानप्रत्ययः अइउण् णानुबंधोऽणसंज्ञार्थः ऋलृक् ककारानुबंधस्त्वक्
इकुंउक्संज्ञार्थः एओङिति ङकारराङ्संज्ञार्थः ऐऔजिति चकारस्त्वचइचएचऐचसंज्ञार्थः वर्णानामसंहि
तत्वेनबोधनायसंहितायाऽविवक्षणादेतेषुसंधिः स्वराणांचादित्युपाचाम्वादयोऽसत्वे इतिनिपातसंज्ञायां

त॰बो॰
२

निपात एकाजनाङिति प्रगृह्यत्वे प्रकृतिभावान्न संधिरित्यन्ये स्यादेतत् अकाराद्युपदेशेन यथा [illegible] नतु स
वर्णानामाकारादीनां ग्रहणात्तथाकारादयो नोपदिष्टास्तथा ऋलृवर्णावपि सावर्ण्यादिकारोपदेशेनैवोभयसिद्धेः।
किं पृथगुपदेशेन तत्र जातिपक्षे ऋलृवर्णयोः पृथगुपदेशो व्यर्थकस्तयोर्भिन्नजातित्वादिति वाच्यं सावर्ण्यविधे
कजात्युपदेशाज्जात्यंतरस्यापि लाभात् ऋलृवर्णयोः प्रत्येकं त्रिंशतः संज्ञासिद्धये अणुदित् सवर्णस्येति सूत्रे
ऽण्ग्रहणस्य जातिपक्षे प्रत्याख्येयत्वादिति चेत् अत्राहुः ऋलृवर्णयोः सावर्ण्यस्यानित्यत्वं ज्ञापयितुमुभ
योरुपदेशः तत्फलं तु क्लृप्तशिखस्यापत्यं क्लृप्तशिखस्य ह रालोबाधनेन क्लृप्तशिखेति सिद्धम् ऋलृवर्णयोः
सावर्ण्यस्यानित्यत्वेन तु अनृत्वदिति पर्युदासात् इकारस्येव लृकारस्यापि प्लुतो न स्यादिति समाधानं तत्र सम्यगनुपल
ब्धत्वादर्शनीया इति हयवरट् टानुबंधोऽट् संज्ञार्थः हकारोपदेशस्तु अट् अश् हश् इण् ग्रहणेषु हकारग्रह
णार्थः अर्हेण अट्कुप्वाङ् नुम्व्यवायेऽपीति णत्वं देवाहसंति इत्यत्र भोभगो अघो अपूर्वस्य योऽशि इति रोर्यत्वं देवाहसंति हुपि
वेत्युत्वं लिलिहिढ्वे लिलिहिध्वे विभाषेट इति ढः लण् णकारोऽनुबंधः अण् इण् यण् संज्ञार्थः ननु अण् इति
केचित्पूर्वेणैव णकारेण गृह्यते केचित्तु परेणैव णकारेण इण् इति तु परेण [illegible] णकारेणैव तथा च किं संदे
हायानुबंधांतरमेव कर्तुमुचितं सत्यं व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति परिभाषा ज्ञापना

र्थं पुनर्णकारोऽनुबन्ध इति स्थितम् । माङ्के ञमङणनम् मकार इत्संज्ञार्थः अम् यम् ञमं संज्ञार्थः । झभञ् ञकारो यञ् संज्ञार्थः । घ
ढधषिति षकारस्तु झष् भष् संज्ञार्थः जबगडदश् शानुबन्धोऽयं अश् हश् वश् झश् जश् बश् संज्ञार्थः खफछठथचटतवि जश् बश् २
ति वकारस्तु छव् संज्ञार्थः कपयिति यकारो यय् मय् झय् खय् चय् संज्ञार्थः शषसरिति रेफस्तु यर् झर् खर्
स्त्र ५ चर् शर् संज्ञार्थः हलिति लकारं अल् हल् वल् रल् झल् शल् संज्ञार्थः पुनर्हकारोपदेशस्तु वल् रल् झल् शल्
ग्रहणार्थः रुदादिभ्यः सार्वधातुके इति क्त्वादि लक्षण इट् स्नि हि त्वा स्नेहित्वा न स्त्वा
सेडिति निषेधवाधित्वा रलो व्युपधादिति वा कित्वं अदाग्धा घकारस्यासिद्धत्वेऽपि हकारस्य झलत्वात् झलो
झलीति सलोपः अलिट् न पातनइति कश्च ननु पुनर्हकारस्योपदेशस्यावश्यकत्वेऽपि शर् मध्य एव हका
रपठित्वात् अलो तस्य हलो नंतराः संयोगः झलो झलि शल इगुपधेत्यादि सूत्राणि सानुबन्धानि नानि अतोऽस्य पादनि ५
हयो नं तराः संयोग इत्येवं सू पाणिरेफानुबन्धात्येवं कृत्वा हलिति प्रत्याहारः सूत्रे त्यज्यतां तथा हि सति हरिर्हसति
हरिर्हरिं पश्यतु इत्यादि न सिध्येत् तत्र खरवसानयोर्विसर्जनीयो वाशरीत्यादि प्रसङ्गात् अतो हलिति सूत्रमावश्यक
मेव एवं च हलिति सूत्रे ग्रन्थमिति वक्ष्यमाणग्रंथानां विस्वरसतः संगच्छते स्थाणादि संज्ञार्थं प्रयोजनं येषां तानि इति

च ३ अणादि संज्ञा हरं त्वमित्यत्रान्योन्याश्रयपरिहारस्तु रं त्वं हरिति
न्यासेनावसाहर प्रत्याहार बोधक सूत्र समुदायानां त्वं
मिदित्यर्थे न वा एकैक इति भावः ॥ ८ ॥

न्या॰दी॰
१

विग्रहः अणादिसंज्ञाभ्य इमानीत्यस्य पदविग्रहो वा अर्थेन नित्यसमासो विशेष्यलिंगता चेति वक्ष्यमाणत्वात् एषामंत्याद्
त इति एषां सूत्राणामंत्याणादयोः हलंत्यमित्यनुपदं वक्ष्यमाणेनेत्संज्ञकाइत्यर्थः अकारश्चेति अनंतरत्वात्पृथगु
क्तिः वचनपरिणामेन इदितिसंबध्यते इत्संज्ञा चास्योपदेशेजनुनासिक इत्यनेन नए वंचणादिभिरिद्भिरादिरंत्ये
नेति वक्ष्यमाणेन प्रत्याहारग्रहणात् अणादिसंज्ञार्थानीति यदुक्तं तत्संगच्छते इति भावः अकारश्चोच्चारणार्थ इति न
तु लण्सूत्रस्थाकार इत्येवं प्रयोजनाभावे इत्यर्थः हलंत्यम् अन्ते अवसाने भवमंत्यं दिगादित्वाद्यत् उपदेशेजनुनासिक
इ रित्यत उपदेश इदिति चात्रानुवर्त्तते आदिरंत्येनेति सूत्रेण सहान्योन्याश्रयमाशंक्याह तत्रा तं परिहरति हलि
ति सूत्रेंत्यमिति हलित्यंत्यमिति विग्रहे सप्तमीति योगविभागात् सुप्सुपेति वा समासः इति भावः यद्वा षष्ठीतत्पु
रुषोऽयं हलिति सूत्रस्यांत्यमित्यादि इति व्याख्यानसंभवात् आदिरंत्येन सहेता अंत्येनेति किम् सुडिति प्रत्याहारस्तृ
तीयैकवचनाव्ययेन मा भूत् इति काशिकाकृत् यद्यपि टकारोत्र संघस्य टाटकारो प्यंतो भवति तथाप्यंत्येनेति ग्रहण
सामर्थ्यादंत्यत्वप्रयुक्तायस्येत्संज्ञा तेनैव प्रत्याहारः न हि टा टकारे हलंत्यमितीत्संज्ञा प्रवर्त्तते नचैवं रप्रत्याहारासि
द्धिः लण्सूत्रस्थावर्णस्यानुनासिकत्वप्रतिज्ञासामर्थ्यादंतेनेतापीति नाप्रत्याहारान्न सिध्यतीति काशिकाशयः निष्क

का१

६

वेत्त्विह स्वौजसमौडिति सत्वे दृश्यिष्यते विस्तरस्तु शब्दकौस्तुभेऽनुसंधेयः इत इति किम् रथ ... स्यात्कारो यथा स्यात् स
हानुनासिकत्वप्रतिज्ञासामर्थ्यादिनं स्येनापि प्राप्येत तद्युक्तं न चैव तदिति तस्यस्याविरहेत स्यते इति शब्दकौस्तुभे स्थितं।
अत्राद्यंता अवयवा अवयवी समुदाय आक्षिप्यते तस्य च युगपदुच्चारणप्रयोगाभावात् तदवयवे ... अंती संज्ञा व२
गे ७ मध्यवृत्ति प्राप्येत तेन त्वाद्यंतयोः संज्ञा स्वरूपांतर्भावेण तयोः पारार्थ्यनिर्णयादिस्साशयेनाह मध्यमानामिति तस्य
चेति स्वरूपमित्यनुवर्त्तत इति भावः स्वरूपं चादेरेव गृह्यते नांत्यस्य अंत्येनेत्यप्रधानतृतीयानिर्देशात् सर्व।
नाम्ना मुत्सर्गतः प्रधानपरामर्शित्वात् ननु स्वमित्यस्यानुकर्षे लोकः संज्ञीत्याकाङ्क्षायाः शांतत्वादंग वयव्याद्येपो
न स्यात् तथा चेकोयणचीत्यादाविकारस्यस्यात् यकारः स्यादकारे परे इत्येवमर्थं स्यात् मैवं आदेरेव संज्ञित्वे तु आदि
रंत्येनेति संज्ञाकरणस्य वैयर्थ्यापत्तेः किंच अण् अक् अच् अट् अम् अपणदीनाद्यन्तनिर्देशेऽपि व्यर्थः स्यात् सर्व
त्र अकारस्यैव संज्ञित्वादिति दिक् शब्दकौस्तुभे तु आद्यंतावयवद्वारा समुदायानुकरणेन सिद्धे अंत्यव्याहृत्यर्थमि
दं सूत्रमिति स्थितं उपदेशोऽजनुनासिक इत् उपदेशे किम् अग्निचित् सोमसुत् इति काशिका अत्रेत् संज्ञायां लोपस्या
त् न च तु को वैयर्थ्यम् आगन्त्वस्मादौ चरितार्थत्वात् न च क्विपः पित्त्वस्य वैयर्थ्यं अग्निचितावित्यादौ चरितार्थत्वादिति
हरदत्तः अंत्यं किम् मनितोमकारस्य मा भूत् सत्या हीत्संज्ञाया [illegible] मंत्यादचः परः स्यात् वेशमस यस सर्वेधा तु

त॰ बो॰ ४ सोमभविन् हलिति किम् नस्सत्तायां भविता नच प्रयोजनाभावात् नेत्वमिति वाच्यं सत्त्वाऽइत्संज्ञायामुदित्त इतीड्विकः
ल्पायते: अन्येनुचिरिणोति जिरिणोतीड् इत्यधातोरंत्यस्य मा न त् सत्याऽइत्संज्ञायामिदित इति नुम् स्यादित्यपि: आद्य
न्तारस्यामिति आद्योन्तु रणा विषयी भतोय: शब्दस्तस्यांत्य हलित्स्यात् इति फलितोर्थः उपदेशेऽजनुनासिकातसरूप
ज्ञापकमुपदेश: उपदेशानमुपदेशा: नमुपदेशा: भावेघञ् उपदेशे किं अनर्अॉ अपः समम्पर्य्याद्योत्तकोऽत्रा
डु: आडोनुनासिकश्छन्दसीत्याकारोनुनासिक: पद्यपीह तुजः उद्दत्यत्रेवानुनासिकविधानसामर्थ्यान्नेत्वमि
ति स्मंबच तथा प्युनरार्थमवश्यंकर्तव्यमुपदेशग्रहणं स्यष्टप्रतिपत्तये इहैवकृतं अचू किंमनिनोमकारस्यमा
भूत् नचहलंत्यमित्यंतग्रहणसामर्थ्यादंत्यस्य मकारस्यन भवेदितिवाच्यं आलच् आलट प्रत्ययादौ अतिप्रसंगवारणेनत
ई ५ स्य चरितार्थत्वात् अनुनासिक: इति किम् ईक्षदर्शनेंद्विते: सत्त्यां ही संज्ञायां श्वीदितोनिष्टायामितीएनस्यात् यद्यप्यत्रो
पजीव्यत्वादनुनासिकसंज्ञाप्रथमं ... तथापि नासिकामनुगत इतियोगाप्रयोगेनैव गतार्थत्वात् अनुना
सिकसंज्ञासूत्रमंदप्रयोजनमिति ध्वनयितुं नेहोपन्यस्तम् नचैवंयरोनुनासिक इत्यत्र परः पञ्चम तस्यानुनासिक श
ब्दे परेऽनुनासिकशब्दस्य स्यादित्यर्थः प्रसज्येत स्वंरूपमिति परिभाषोपस्थानात् संज्ञाकरणेतु अशब्दसंज्ञेति नि
षेधान्नायंदोष: इति वाच्यं उक्तपरिभाषायां भाष्ये प्रत्याख्यानात् उपान्मंत्रकरणे पुछ भांडचीवराणि ङ: ङ: मुहिन

त्वमित्यादिनिर्देशेन संरूपमिति परिभाषाया अनुपस्थितिकल्पनात् सूत्रमतेऽपि दोषाभावात् ननूक्तनिर्देशा प्रत्ययेऽत्र
निवर्तितोऽस्त्वमिति चेत् अत एव निष्प्रयोजनमित्यनुक्त्वा मंदप्रयोजनमित्युक्तं प्रतिज्ञायत इति प्रतिज्ञा अंतस्था
पसर्गे इति कर्मण्यङ् अनुनासिकस्य भावः अनुनासिक्यं गुणवचनब्राह्मणादिभ्य इति ष्यञ् प्रतिज्ञा अनुनासि
क्यं येषामिति विग्रहः कैश्चित्तु प्रतिज्ञातं प्रतिज्ञा साऽस्यास्तीति प्रतिज्ञः अर्शआद्यच् प्रतिज्ञं अनुनासिक्यमे
षामिति विग्रह्यते यद्यपि सूत्रकारेणोक्तं तेऽननुनासिका वा इदानीं परिभ्रष्टास्तथापि वृत्तिकारादिव्यवहारबलेन
यथाकार्यं प्राक् स्थितं इत्यनुमीयत इति भावः पाणिनीया इति पाणिनिना प्रोक्तं पाणिनीयं वृद्धाच्छः तदधीयते
विदंति वा पाणिनीयाः तदधी ते इत्यण् प्रोक्ताल्लुगिति लुक् न तु रलयोरिति न्यूनं रकारस्यापि मध्यपातित्वात्
तत्राह प्रत्याहारेष्विति अनुनासिक इत्यादीति आदिशब्देन पापाणके कुत्सितैरेऽ इत्यादिग्राह्यं प्रत्याहार
शब्देनेति प्रत्याह्रियंते संक्षिप्यंते वर्णा यत्रेति प्रत्याहारः करणाधिकरणयोश्चेति ल्युटि प्राप्ते कृत्यल्युटो बहुलमिति
बहुलग्रहणादधिकरणे घञ् यद्यपि योगमात्रमकारादिसंज्ञास्वतिप्रसक्तं तथापि योगरूढिरिति भावः ऊका
लोऽज्झ्रस्वदीर्घप्लुत इति समाहारद्वंद्वे सौत्रं पुंस्त्वं उ ऊ ऊ३ इति त्रयाणां प्रश्लेषेण निर्देश इत्याह उश्च ऊश्च ऊ३श्चेति वः
वामिति त्रयाणां सवर्णदीर्घे कृते जसि पाणिवः अमिति वा कालः इव कालो यस्येति फलितार्थकथनमिदं विग्रहस्तु वः

त॰बो॰
५

कालोपस्येति बोधकः कृशब्देन स्वोच्चारणकालो लक्ष्यते अच् किं संयोगस्य माभूत् प्रतस्य प्रतस्य कपयोरेकमा
त्रत्वे न ह्रस्वसंज्ञायां ह्रस्वस्य पिति कृति तुक् स्यात् आयेइति निपाता आद्युदात्ता इत्याकार उदात्तः यच्छब्दस्य
पिट इत्यन्तोदात्तः ततः परस्य जसः सुप्त्वादनुदात्तत्वे यदात्वे पररूपत्वे शीभावे आद्गुणे च सत्येकादेश उ
दात्तेनेत्येकार उदात्तः अर्वाङिति अर्वतीमंचतीत्यर्वाङ् ऋत्विगित्यादिना अंचतेः सुप्युपपदे क्विन् ऋगता
विस्यसा सत्तामधिपंथानीत्यादिना वनिपि गुणे च निष्पन्नोऽर्वन् शब्दो धातुस्वरेणाद्युदात्तः वनिपः पित्त्वेनाँदा न५
त्तत्वात् अंचतेरकारो विधातुस्वरेण नित्स्वरेण वाद्युदात्तः उपपदमतिङिति समासे कृते समासस्येति स्वरेण
तदपवादे न गतिकारकोपपदात् कृदिति कृदुत्तरपदप्रकृतिस्वरे वा अंचतेरकार उदात्तः वनोतलो ए६
पेसवर्णदीर्घे च कृते एकादेश उदात्तेनेत्याकार उदात्तः इत्यनुदात्तं पदमेकवर्जमिति शिष्टतिघातादद्य
कारोऽत्रानुदात्तः एतच्च संभवाभिप्रायेणोक्तं वेदभाष्ये तु अर्वाङ् अभिमुख इति स्थितं अर्वाञ्चमिति अ
विवक्षितमित्यर्थः तस्य चोदात्तस्वरितपरत्व इति उदात्तस्वरितो परो यस्मात्तदुदात्तस्वरितपरं तस्य भा
वस्तत्त्वं तस्मिन्सतीति उदात्तो वा स्वरितो वा परश्चेत्पूर्वस्य स्वरितस्य यदुत्तरार्द्धमनुदात्तं तस्य श्रवणं स्यादि
मित्यर्थः अन्यत्रेति उदात्तस्वरितपरत्वाभाव इत्यर्थः क्वेति किमात् तिसृस्वरितं वद्वित्यनुदात्तं सर्वमपादा

वित्यधिकारादनुदात्तः अप्सुवा इति अप्सोंकृतिसति निस्वरेणाद्युदात्तत्वं संहितायां त्वेकादेशनुदात्तेनोदात्तः
स्योकारानुदात्तः नुदात्तपरत्वेऽक्रमस्वरितस्योदाहरणमुक्त्वा दीर्घस्वरितस्योदाहरणमाह रथानां नयेरा इतिय
७ अरा इति द्वयमपि फिट्स्वरेणांतोदात्तं एकादेशास्त्पक्षे स्वरितः स्वरितोवानुदात्तेपदादाविसुक्तेः स्व
रितपरत्वेनुदाहरणमाह शतचक्रमितिपद इति फिट्स्वरेणांतोदात्तः ततः परस्य सकारस्य रुत्वेउ [redacted]
[redacted] त्वेद्याद्गुणेच नुदात्ते नेकादेशादोकार उदात्तः अप्सु इति स्वरितात्स
त्वादकारस्य प्राप्तनिघातत्वेनोकारेण सह एकादेशेच कृते स्वरितोवानुदात्तेपदादावित्योकारः स्वरितः
कथमहस्य इति स्वरितांतत्वमितिचेन्न अत्राहुः अह्नामापावित्यस्मात्कर्मणिल्युटपत् स्वरितं ह्रस्वभावस्त्व तित्स्वरितमिति द्
संज्ञापूर्वकविधेरनित्यत्वादिति अभिमीलत इति ईकारस्वरि तत्वइतितु प्रचपा परपर्यायाः एक
श्रुतिरितिच स्वरप्रक्रियायां ऋत्वएवस्फुटीभविष्यति मुखनासिका इति मुखंचनासिकाचेति विग्रहे प्राण्यंग
त्वादेकवद्भावे मुखनासिकमितिस्यादत्र आह मुखसहितेतिनासिकयोच्चार्यतेति फलितार्थकथनमिदमु
च्यतेऽनेनेति वचनंमुखनासिकावचनमस्येति विग्रह तुल्यास्यप्रयत्नं आस्यभवमास्यं शरीरावयवाच्चेदि
त्यमित्रस्याह तात्वादीति आभ्यंतरेति एतच्चप्रशब्देना लभ्यते तुल्यास्येतिकिं नर्हि यकारस्य तकारप

त॰बो॰ ६

परेकरोरुदीन्निलो यो मा भूत् प्रयत्नग्रहणं किम् वाकृश्चोततति शोस्मलोपो मा भूत् ञमङणनानामिति नासिका
चेति चकारेण स्वस्ववर्णानुकूलं तालत्वादि समुच्चीयते एदैतो रित्यादौ तपरत्वमसंदेहार्थं नतु कालग्रहणा
र्थं तेनेप्लुतस्यापि संग्रहः चतुर्द्धेति निष्कर्षपक्षे तु पंचविधो प्रयत्नाभीष्ट इति तद्प्रयत्नाभ्युपगमात् स्पृष्टेषत्स्पृ
ष्टेति तेषामाभ्यंतरत्वं वर्णोत्पत्ति प्रागभावित्वात् तथाहि नाभिप्रदेशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्द्ध्वमा
क्रामन्नुरः प्रभृतीनि स्थानान्याहंति ततो वर्णस्य तदभिव्यंजकस्य ध्वनेर्वोत्पत्तिः तदुत्पत्तेः प्राग्यदा जिह्वाग्रो
पाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं तालत्वादि सम्यक् स्पृशंति तदा स्पृष्टता ईषद्यदा स्पृशंति तदा ईष
त्स्पृष्टता समीपावस्थानमात्रे संवृतता दूरत्वे विवृतता अतएव श्चुपशान्तो तालव्यत्वाविशेषेपि तालुस्थाने
न सहृत्जिह्वाग्रादीनां च वर्णोच्चारणे कानेकसम्यक् स्पर्शः चकारे ईषत्स्पर्शः शकारेकारयोस्तु दूरेवस्थि
तिरित्याद्यनुमेयं शिक्षाकारोक्तं चानुसृत्य विवेचनीयम् विचारसंवाराद्ययस्तु वर्णोत्पत्तेः पश्चान्मूर्द्धिप्र
तिहतेति वृत्ते प्राणाख्ये वायावुत्पद्यंते इति बाह्या इति ब्रुवंते गलविलसंकोचात् संवारः तस्यैव विकाशा हि चकार
वार एतौ च संवृतविवृतस्वरूपाभ्यामाभ्यन्तराभ्यां भिन्नावेव तयोः समीपदूरावस्थानात्मकत्वादित्यवधेयं अत्र
सुपामिति विभक्तौ तु कुत्राद्यो विवृतद्वितीयस्तु संवृतस्तदाह विवृतमनुष्येति विवृतस्पर्शस्थाने इत्यर्थः

न१ वं२

विहतत्वमस्त्वेवेतितेन दंड्डायनमित्यादौ सवर्णदीर्घः सिध्यतीतिभावः पूर्वत्रासिद्धं यद्यप्ययंस्वतंत्रोविधिः स्यात्तर्हित्रि
पादी पूर्वंप्रत्यसिद्धाद्दृत्वबलमेतत्त्रैपादिकंतुपूर्वंप्रतिपरंनासिद्धंस्यात् तथाचप्रशानित्यत्र मोनोधातोरितिनत्वस्या
सिद्धत्वात्तल्लोपः स्यात् नत्वविधेसंबुद्धौ चरितार्थत्वात् तथा तद्धानित्यत्रसंयोगांतस्लोपस्यासिद्धत्वान्नलोपः
स्यात् नुमविधेस्तुसंबुद्धौचरितार्थत्वात् अतआह अधिकारोयमिति त्रिपाद्यांविहितं कार्यमिति कार्यासि
द्धपदेतु अमअममुमित्यादिनसिध्येदितिभावः यथा चेतत्तत्सिध्यति तथा अदंशब्दव्याख्यानावसरेअस्माभिरुपपा स्
दयिष्यते एकादशाध्येतियद्यपिमाधवेन त्वाबुक्तानुदात्तादयस्तुनोक्तास्तथापिकैयटोक्तिमनुसृत्यैकादशेत्युक्ता इ
तिबोध्यं स्वरूपमाहुरिति।। बाह्यप्रयत्नाः केचित्तुगमोपायेनोपनिबद्धाः तद्यथा खरोविवाराःश्वा
सा अघोषाश्चहसः संवारानादाघोषाश्च वर्गाणांप्रथमतृतीयपंचमायणश्चाल्पप्राणाः वर्गाणांद्वितीयचतु
र्थौशलश्चमहाप्राणाइतिश्वासानुप्रदानाइतिश्वासाः प्रयत्नः काइत्यर्थः विवृतएवैतेकएवमिति विचारणीयांप्रय
त्न इतिभावः अन्येत्विति हृशोहृशां यमा अनुस्वारश्च नादेति नादभागिनोप्रयत्नवंतः अयुग्मा इति प्रथमतृती
यपंचमावर्गेष्वयुग्मा वर्गयमगा इतिवर्गा यमगाश्चस्पर्शाः अल्पेति अल्पासवोऽल्पप्राणाः पुंसि तु मन्नासवःप्राणाः

गा नाद२

ववतां महाप्राणस्य हस्वत्वाद्दृशो वर्गचतुर्थ इत्यादिस्कृ ... विष्यति कादय ॥२

नादवतो १

भावः १ त

समरः अनुपयुक्ता इति अन्यथा कखगघादीनां परस्परं सावर्ण्यं न स्यादिति आंतरं स्पपरीत्याभ्यामुपयोक्तं त इति प

त.वो. रीत्याघोषस्य महाप्राणस्य तस्य ताद्दृश एव घकारः घोषं इति लोकप्रसिद्धपाठापेक्षमिदं चतुर्दशसूत्रं माविसान्तत्वाये

७ गात् कंचाम्भांप्रामिति एतच्चोपलक्षणं खफानां प्रामित्यपि बोध्यम् अर्धविसर्गेति ताद्दृशमुच्चारणे तेरवस्वेनैव बोध्यम् अ स२

लृवर्णयोरिति ऋलृकइ इति प्रकृतिभावः विग्रहस्तु आचलृवर्णश्च ऋलृवर्णौ तयोरित्येके मतोरमायांतु आ

चआचरलौतेभ्यवतो वर्णो चेत्यादि स्थितम् नाज्झलौ आकारसहित इति कालसमयवेलासु तुमुन्नित्यादि निर्देशात् आ

कारप्रश्लेषेलिंगं यणादिकमिति शीतलशब्देसवर्णे दीर्घः आदिशब्दार्थः इह अ सेध त इत्यादौ हो ह इति हत्वं

नेति सुवचं इण इति सस्य षत्वं नेति तु न सुवचं हत्वं प्रति तस्यासिद्धत्वादिति दिक् अन्यथेति नाज्झलाविसस्यान्तरं

नेग्रहणकशास्त्रबलादिति अयं भावः ग्रहणकशास्त्रबलाद्दीर्घादीनामिव हकारादीनामप्यकारादिवाच्यत्वा

अनुपगमे अच्त्वं स्याच प्रत्याहारेषु तद्वाच्यवाच्यत्वे निरूढलक्षणा स्युपमामात् इति अविधीयमानोऽणि

न तिनेदं समइ शइत्त त्रिमात्र इकारो न भवति उदित्वेति इहविधीयमान इति न संबध्यते उदित्करणसामर्थ्यात्तेन

विधीयमानो प्युदित्सवर्णान गृह्णात्येव कुहोश्चुः जगाद जघटे परेणणकारेणेति व्याख्यानतो विशेषप्रतिप

त्तेः ऋतउदित्यादौ तपरकरणात्तिंगाच्च यदि ह्वर्णस्य ... हितपरत्वमिहानर्थकं स्यात् ऋवर्णस्यानणत्वेन सव

उपसर्गादिति १

७

र्णग्राहकत्वात् एवं च तपरत्वाद्दीर्घेन उपॠकारीयतीत्यादिवक्ष्यमाणग्रंथोपि संगच्छते एवं ऌकारोपीति
त्रिंशतः संज्ञेत्यनुपपत्तेः एतच्च न्यायसाम्यादुक्तं वस्तुतस्तु ऌकारस्य ऋकारग्राहकत्वं न क्वाप्युपलभ्यते सू
त्रारंभसामर्थ्यादिति सति तु सावर्ण्ये एकारेण ऐकारस्य ग्रहणे ओकारेणौकारग्रहणे ऐऔजिति सूत्रारंभो वृथा
स्यादिति भावः नाप्यादनीयमिति तेन म्लाविं ग्लाव इत्यत्र औतोम्शसोरिति न प्रवर्तत इति मूल एव स्फुटीभ
विष्यति यद्यपीति ग्रहणकं शास्त्रस्याद्याप्यनिष्पन्नेरिति भावः एतच्चाकः सवर्णे दीर्घ इत्यत्र स्फुसादपिव्या
मः आद्गुणेति अन्तराणां समाम्नाया उपदेशसूत्राणि तत्र भवाः आदरसमभ्यापिकाः ककचोतोदात्तादि
इति है तिवज् होढ इति न भवति यद्यप्याकारप्रश्लेषाभावे संयोगांतलोप एव प्राप्नोतीति तथा तत्स्यासिद्धत्वाद्दत्तात्रस न तद्द
योगांतलोपो न भवतीति वक्तुमुचितं तथापि कार्यकालं संज्ञापरिभाषमिति पक्षे त्रैपादिके तरंगे बहिरंग
परिभाषाया प्रवृत्तेरंतरंगे ढत्वे कर्तव्ये बहिरंगः संयोगांतलोपोऽसिद्ध इति मत्वेदमुक्तमित्येके अन्ये तु
संज्ञापूर्वको विधिरनित्य इत्यलोपस्य वारणं कथंचित्कर्तुं शक्यमित्याशयेन ढत्वं नेत्युक्तमित्याहुः विश्व
पामिति स्तुपलहाणां विश्वयाम्पामित्यादावपि न भवति होढ इत्युपलक्षणं ध्यगापुरित्यादौ कथोह इत्याका
रस्य घकारो नेति दिक् यदि तु विहितमप्यप्रणामित्यत्रैव तस्य मित्यत इष्टादिग्रतु वर्त्यैस्व राणां चेत्यतो नि वर्त्यई

नर र

नं.बो यद्विवृतमस्पृष्टं विवृतं स्वराणामिति प्रयत्नभेदो व्याख्यायते तदा नाज्झलाविति सूत्रं त्यक्त्वैव शाकलमित्याकारेऽस्थि
८ तं अनुनासिकास्त इति येनाक्षरसमाम्नायिका अणस्तएव सवर्णानां संज्ञा भवंतीति भावः एवं च रेफहकारयोश्च
हा३ अणप्रत्याहारांतर्गतत्वापि न कस्यचित्संज्ञा तत्सवर्णस्यान्यस्याभावादित्यवगंतव्यम् सवर्णत्वपरत्वेति तत्रादिनोभ
यं विवक्षितमिति भावः वृद्धिरादैच् आच्चैऐच्चेती तरेतरयोगद्वंद्वः रूपं समस्तुगिति अोडः सलुग्वा यथा समा
हारद्वंद्वः न चैवं द्वंद्वाच्चुदषहांतात् समाहार इति टच् स्यादिति वाच्यं समासांतविधेरनित्यत्वात् तत्र च प्रमाणं
समासेष्वेव ह्यामः अथवा आदिश्च समेव वाच्य वृद्धिशब्दसंज्ञेण ह्रस्यावा याजनीयः अपरस्परादित्वेन भवा
ढौः कुवैरिजितिद्धिमात्रएव तात्परत्वात् तेनतकैकस्त्वमित्यत्र त्रिमात्रो न वृद्धिप्रदेशा वृद्धिरेचीत्यादयः अ
देङ्गुणः तपरकरणमिह सर्वार्थं तेन गंगोदकमित्यत्र त्रिमात्रो न तरतीत्यत्रत्वकार एव न तुकादपि द्विदाकारः न
च प्रमाणतः आन्तर्येण नियमसिद्धिः रपरत्वे कृते एकस्यार्द्धमात्रत्वात् अपरस्यार्द्धव्यंजनीयमात्रत्वात् गुणप्रदे
शास्तु आद्गुणः अतोगुणे इत्यादयः भूवादयो धातवः भूश्च वाश्च भूवौ वा इति द्वंद्वः आदिशब्दो व्यवस्थाप्रकारवाचि
नो रकेशेषः आदिश्च आदिश्च आदी भूवौ आदी येषां ते इति विग्रहः अत्र मतयोर्व्यासदृशा साहश्यं क्रियावाचक
त्वेनेत्यभिप्रेत्याह क्रियावाचिन इति क्रियावाचिनः किं पाः पचतीत्यादेर्भावात्कथं सन्निहितस्मित्ता नोधा

वा ६५४ प्रासी १ चर ८

नोरित्यालोपः स्यादितिस्थितं मनोरमायां प्रादयः किंहिस्वकं पृथक् संज्ञा चादीनामुदितकरणेन सौत्रास्तां प्राग्वत्संज्ञा
प्यते चुलुंपादीनामनुवृत्तमेतल्लिदर्शनमितिगणसूत्रेण ग्रहः प्राग्रीश्वरात् एक विशिष्टग्रहणं किं ईश्वरे तोसुन्क
सुनाविति स्वस्य प्रापितन्यायेनावधित्वं माभूत् यदितु प्रत्यासत्त्यैवाधिरीश्वर इत्यस्यावधित्वसिद्धिरित्युच्यते तर्हि स्पा ३
स्पष्टप्रतिपत्त्यर्थमेवास्तु चादयः अद्रव्यार्थाः किंपशुः लिंगसंख्यान्वितं द्रव्यम् इहतु सादेवलोध्रं नयंतिपशुम
न्यमानापशु इति सम्प्रयार्थेगतिश्च उपसर्गसंज्ञायाः समावेशार्थश्चकारः अन्यथा आकडारादितिपर्यायः
स्यात् तत्फलंतु अलोयमित्यादावुपसर्गादसमासेपीतिणत्वं गतिकारकेति कृदुत्तरपदप्रकृतिस्वरसिद्धिश्चेतिदिक्
निसनिरदुसदुरइति उपसर्गस्यापत्ताविति निर्ईरोर्लत्वं निलयते दुलयते निसादुसश्च रुत्वस्यासिद्धत्वाल्लत्वा
नावः निरयते दुरयते नवेतिविभाषानेति निषेधो वेति विकल्पस्तदाह निषेधविकल्पयोरिति विभाषाश्व
रित्यादिषु प्रतिषेधविकल्पावुपतिष्ठेते तत्रप्रतिषेधेन समीक्षितेन विभाषा पक्षाद्विकल्पः प्रवर्त्तते शुशुवा वशि
श्वायत्यत्र प्राप्ते विकल्पः शुशुवतुः शिश्वियतुरित्यादौ तु वचि स्वपीति नित्यप्राप्ताविति विवेकः तत्रेदं बोध्यमिति
प्राप्तः काकाक्षिगोलकन्यायेनोभाभ्यां संबध्यते स च पूर्वार्थे विपर्यासः कृततेन ननिषेधो विकल्पश्च नवाशब्दा
र्थः संज्ञो विभाषावाशब्दार्थो विकल्पः संज्ञायामनयत्र विनाभविदं सूत्रं प्राप्तविभाषायामप्राप्तविभाषायां च नास्या

वृ॰ बो॰ पयोगः प्राप्तविभाषायां भावांशस्य सिद्धत्वेन विभाषाश्रुत्या पक्षे भवतीति भावांशमनूद्य पक्षे न भवतीत्यभावमात्र

८ करणात् अप्राप्तविभाषायां तु अभावांशस्य सिद्धत्वेन पक्षे न भवतीत्यभावांशमनूद्य पक्षे भवतीति भावांशमात्र

द्द करणात् विभाषा श्वेरित्युभयत्र विभाषायां तु यदि विधिमुखेन प्रवृत्तिस्तर्हि पितृ स्ववसं प्रसारणविकल्पः स्यात्

किंतु तु पजादित्वाद्वचिस्वपीति नित्यमेव स्यात् अथ प्रतिषेधमुखेन प्रवृत्तिस्तर्हि किंत्वेव प्रवृत्तिः स्यात् ननु

पितृ तु न च वितस्तु विधिमुखेन किंतु निषेधमुखेन तूभयथापि प्रवृत्तिरस्त्विति वाच्यं वैरूप्यलक्षणवाक्यभेदप्र

संगात् संज्ञाकरणेन तु श्रुतत्वक्रमात् [redacted] रोधेन नेति प्रतिषेधः प्रथमं किंतु प्रवर्त्तते ततः किंदकिंद्रूपेस

वेस्मिन् लिटि एकरूपे प्राप्ते सति पक्षे भवतीत्येकरूपेण विधिमुखेनैव प्रवर्त्तते इतीति किम् घुसंज्ञाव

त्स्वरूपमिति वच नाच्छ्वस्य संज्ञा मा भूत् तथाहि सति विभाषा [illegible] नवा शब्दः श्रूयते शाद्शब्दस्य

र्थः स्यात् इति शब्देन तु सति स्वार्थं संज्ञीति लभ्यते तथा हि लोके ह्यर्थः प्रधानः शब्दः गौरित्ययमाह स्यादेतत् अशु

वत्स्वरूपपरः संपद्यते व्याकरणे तु स्वं रूपमिति परिभाषणात् स्वरूपपरत्वमौत्सर्गिकं इति शब्दस्य समभिव्या

हारेत्वर्थपरतेति विशेषः इदमेवेति शब्दस्य पदार्थविपर्यासकत्वं नाम संज्ञात्वमर्थस्य वनतु विभाषाशब्द

स्येति व्याख्यानस्य दृष्टांतत्वस्याभिप्रायो वैरूप्यापहारः फलं तु नयत्र विभाषा हि नस्त त्रमप्यपवर्तेहरतेर्न ८

२१ २५ २३

अप्रीत्व स्वपस्यासंभवात् ६

हरणार्थत्वाद्विकारार्थस्य करोतेरकर्मकत्वाच्च गतिबुद्धीत्यादिना अणौ कर्तुर्णौ कर्मत्वे प्राप्ते गत्यर्थेतरेषां प्राप्ते तदारंभात् उदाहृतं च नाप्यप्राप्ते तावत् अभ्यवहारयति सैंधवान् अभ्यवहारयति सैंधवैः विकारयति सैंधवान् र
विकारयति सैंधवैः अप्राप्ते तु हरति भारं देवदत्तः हारयति भारं देवदत्तं हापयति भारं देवदत्तेन करोति कटं दे
वदत्तः कारयति कटं देवदत्तेनेति दिक् स्वं रूपं शब्दस्य अग्नेर्ढक् आग्नेयं आण्डायमहन्ते आयद्दन्ते अ
कारयति कटं देवदत्तेन ४ हते इत्यादिसूत्रादङ् यमहन्त एतेनैव संज्ञितः ननु अग्न्यादिवाच्यस्यांगारादेर्ढगादिप्रसंगो न संभवतीति स्वरू
कादेव स्यात् प्रातिपदिकादित्यधिकारात् किमनेन सूत्रेणेति चेत् सत्यं अग्न्यादिशब्दपर्यायेभ्योऽव स्यादिमोमा भूत् इति स
त्र स्यारंभः नन्वत्र रूपग्रहणं विनापि स्वशब्देन रूपमेव ग्रहीष्यते प्रतीतावुपस्थानापेक्षत्वात् असाधारणत्वादंतरंगत्वा
त्तिपत्तापस्थितिकत्वाच्च अर्थो हि प्रतीतौ संबंधग्रहणमपेक्षते पर्यायैरपि प्रत्याय्यमानः साधारणः पदज्ञानजन्यबोधविष
पत्वाद्बहिरंगः [redacted] त्यनुकरणादशायामप्रतीतेर विष
तोपस्थितिक अ... ति किमनेन रूपग्रहणेन उच्यते इदृशास्वार्थोपि विवक्षितो रूपवदिति ज्ञापनार्थं रूपग्रहणं तेनार्थ
वद्ग्रहणे नानर्थकस्येत्युपपन्नं भवति तत्रानुकार्यानुकरणयोरभेदात् स्वरूपमिति वचनात् स्वंरूपं चेति सामर्थ्यादर्थवतोरू

गोरिस्वपमाहि स्यनुकरणादशायाम
पीस्यति पत्ता... स्थितिकत्वाभावात् ८=॥

त॰बो॰ यस्य ग्रहणं तेन कोशे कुशे इत्यत्र शे इत्ययं प्रगृह्यसंज्ञो न भवति ईदूतौ च इत्यत्र तु अन्तग्रहणे न कृतं तमेव मन्यते ननु लक्षणे तत्त्वं तस्मै
१० कदेश इत्यस्यत्र विस्तरः अर्थवच्छब्दे इति किम् उपसर्गे घोः किः दाधाघ्वदाप् यथा स्यात् तु घुधातोः अर्थवत्सार्थकस्मात् न च दाधाघ्विति
घुसंज्ञाकरणसामर्थ्यादेव दाधाघ्वदापः किः स्यादिति वाच्यं घुमास्थेत्यादिना आत इत्वविधौ संज्ञाकरणस्य [illegible] पासीन्
र्थ्यो पदेऽपात इहप्रायः स्वसंज्ञा शब्दसंज्ञेति न षष्ठीसमासः कर्म करणं साधिर्ष संज्ञा स्वरूपग्रहणापत्तेः किन्तु शब्दशास्त्र स४
तत्र संज्ञा शब्दसंज्ञेति सप्तमी समासः तदाह शब्दशास्त्रे या संज्ञेति येन विधि क्रियेति स्त्रोपसर्जनेद्वाः किरिति कर्मणि किप्र
त्ययः येनेति करणे तृतीयानन्तु कर्तरि तस्याः कृद्योगषष्ठ्या बाधात् नचैवं यथाप्राप्तो कर्मणीति नियमेन निर्वाह कर्म
णः कर्मत्वेनाभयप्राप्त्यभावात् तथा च अक्रकरणे तृतीये व करणं व्यवतन्त्रे [illegible] धि इति तस्य एव करणत्वात् एवं चेह तृतीय याया
स्तृत्वं सत्व इष्यते न च वण इजित्वादाविकारादीनां पारतन्त्र्यं [illegible] त्वादीनां च स्वतन्त्रं वा स्यादीनामिव तदादीनामिव सम्भवति किं
तु वैवक्षिकं तेन विशेषणमप्रधानं ताभ्यां तस्य संज्ञेति पलितं तदेतदाह विशेषणं तदन्तस्येति स्वस्य चेति स्वरूपस्य
अनुवृत्तेरेतल्लभ्यते एरच इकारान्तादिकाररूपाच्चे चपः जप स्थपः समासप्रत्ययविधाविति कृद्ग्रहणे कृतः कृदन्ताश्रि
तः नेह कृदन्तमुपश्रितः नडादिभ्यः फक् नडस्य गोत्रापत्यं नाडायनः नेह सौत्रनाडिः अनुशतिकादित्वात् उभयपदवृद्धिः उ
गिद्वर्णेति उगिद्वर्णग्रहणं वर्जयित्वेत्युगिद्वर्णग्रहणवर्जं द्वितीयायां चेति णमुल् महान्तं स्यान्ति कान्तमिति महती मह ति४
[illegible] वस्यागाराद्विष्णुयसर्जनेषिजोरेतिङीपोऽप्रवृत्ते उगित श्रेयसी सुगिद्वत्तानङीप् अतइञ् दाह्निनं चेह विधानसा
मर्थ्यात् तदन्तविधिः अस्यापत्यमिञ् कामः इत्यत्र चरितार्थत्वात् न चैवं भिजोजित्यं व्यर्थमिति वाच्यं बाह्वादिभ्यश्चेत्यत्र

द्वि१

यथा पयं दृष्ट्वा धृतो दृष्टोऽप्यंचरितार्थत्वात् न चैवमोपगवेरित्यादौ वेव व्यत इजर्हत् ननु दाधिर्दित्यादौ अकारस्येहानर्थ
कत्वाद् इति चेन्न वर्णग्रहणे ऽर्थवद्ग्रहणपरिभाषाया अप्रवृत्तेः विरामोऽवसानं विरमणं विरामः भावे घञ् शब्दा
नुशासनप्रस्तावे दृष्ट वर्णानामिति संज्ञाप्रदेशस्वावसानेऽदृस्यादयः अभावे ऽपि बुद्धिकृतो वा पर्यन्त स्यैव यथा
सरित्प्रध्वंसिनानित्यविभूतं वा वर्णानां यद्वा विरम्यतेऽस्मिन्नितिविरामः वाकुल्लकाल करणे घञ् यदुच्चारणोत्त
रं वर्णान्तरं नो च्चार्यते सोऽन्त्यवर्णोऽवसानसंज्ञकः इत्यर्थः अस्मिन्सुपक्षे खरवसानयोरित्यादि सप्तमीविषयभेदा ते५
क्रियते खरि परे रेफस्य विसर्गः अवसाने च रेफस्यानिनीति सुप्तिङन्तं पदम् अन्तग्रहणमन्यत्र संज्ञाविधौ प्रत्य
यग्रहणे तदन्तग्रहणं नास्तीति ज्ञापनार्थं तेन ईदूदेद्द्विवचनं प्रगृह्यमिति न हि द्विवचनान्तस्य प्रगृह्यत्वं अन्यथा कु
मार्योरगारं कुमार्यगारमित्यत्र प्रकृतिभावः स्यात् कथं तर्हि प्रातिपदिकसंज्ञा पा क्त तद्धितान्तं तदन्तग्रहणं
मित्त्यवहाभाज्ञः कृत्तद्धितेति सूत्रेऽर्थवद्ग्रहणमनुवर्तते न तस्मादर्थात्तदन्तग्रहणमिति हलोऽनन्तराः संयोगः लघु
ग प्रयत्नकारणायां संज्ञायां संयोग इति महासंज्ञाकरणमन्वर्थसंज्ञाविज्ञानार्थं संयुज्यतेऽस्मिन्समुदाये वर्णा इति तेना
त्र समुदाये वाक्यपरिसमाप्तिर्न प्रत्येकं गुणवृद्ध्यादिसंज्ञावत्प्रत्येकं तथा हि सति दृषद्भिः मनीत्यत्र वकारसन्निधौ हकारस्य सं
योगत्वात् संयोगान्तलोपः स्यात् नियोयादित्यत्र यकारसंयोगइति वा न्यस्य संयोगादेरित्येवं स्यात् सिद्धान्ते त्वचा
रह्मामिति द्वित्वे सत्यपि तस्यासिद्धत्वाद् त्वमत्र न भवति इह लड्इति जातो वकारवचनं जात्याख्यायामेकस्मि
न्निति वचनात् तेनद्वयोरपि संयोगसंज्ञा भवतीति शिक्षेत्यादौ पुत्रोऽब्रह्यत्र इत्यप्रत्ययः सिध्यति यत्र वा ह

ते३ कर्त्तव्या पा५ ते४

वो॰ ६

त॰वो॰ वाहलः संकिरस्पस्त नद्योर्वकृनं चाविशेषेण संतेतिस्थितमाकरे यदितु बहूनामेव स्यात्तर्हि गोमान् करोतीत्यत्र मनुष्य
२२ स्य कारस्य संयोगान्त लोपो न स्यादिति दिक् हलइति किम् तितउ सं अत्र ततो तिर्डेउ संतव चेति नत्र त्ययः सन्त्वङ्गावाद्धि
त ६ ३ त्वंसमंत्वं तीव्चंच अस्तोच्चारण सामर्थ्यात् गुणमावः यदि हावोरप्यनंतरयोः संयोग संज्ञा स्यात्तर्हि इह संयोगांतस्य सुकार
१४ लोपः स्यात् अनंत इति किं यत संपद्वीह सकारमकारयोः संयोग संज्ञा स्यात्तर्हि स्कोरिति सलोपः स्यात् ॥ इति संज्ञा
प्रकरणम् इको गुणवृद्धी यत्र संज्ञा स्थानी न निर्दिष्टः सार्वधातुकार्द्धधातुकयोः सिचि वृद्धिरित्यादौ तत्रैवंपरिभा
षाप्रवर्तते नांत्रिगतीत्यादौ स्थानिनिर्देशात् गुणवृद्धि शब्दाभ्यामिति एतत्त्व प्रवृत्तसूत्राभ्यां गुणवृद्धि पदेऽनुवर्त्य गुणो वृद्धि स्था॰१
ते॰१ रितियुगणवृद्धी इतियोजना पाल्यते नेहन सदादीर्ममः इमं दिव ओत द्यौः विधि पेत्त इति पत्र त्वनुवादो वृद्धिर्यस्या
चामादिरित्यादो तत्रैक इति लोपतिष्टते अनुवादे परिभाषाणामनुपस्थितेर्लिंगं फलं चादृीचामातः स्थाने इस त्वं न्वय माने
त्र स्फुटीकरिष्यते षष्ठ्यन्तमिति सूत्रे षष्ठ्यंतस्यानुकरणाच्च स्वरूप परतया न पुंस्कासोर्लुकि अत्वसन्तस्ये विशेषणसोधि
ति दीर्घो नेति भावः पदमिति तत्त्व संभवति सामानाधिकरण्ये वेपधिकारणस्या न्याय्यत्वात् इगंतस्यांगस्येत्यादि स्पर्धः अ १
क्रमेण संबध्यते मिदेर्गुणः मृजेर्वृद्धिरित्यादौ तु सामानाधिकरण्यसंभवात् मिदिमृज्यो रवयवस्यैक इति संबध्यते अच
श्च ह्रस्वदीर्घेत्यादि ऐचोश्चोकालोऽजिति सूत्रादच् ह्रस्वदीर्घप्लुतइत्यनुवर्त्य ह्रस्वोदीर्घप्लुतं इतियोजना पाद्यते ह्रस्व
स्यादि किम दिव उत् द्युभ्यां अ एत आविमनौ यत्रो अप्य औ शित्य नल्कं तात्वं निर्देशात् ज्ञापकाद् गशौर्विष ते
ये प्रवर्तमानस्य एतइत्यात्तस्य च स्थानिकत्वे सतिने तात्सिद्ध्येदिति दिक् षष्ठ्यन्तपदमिति तत्त्वस इति संभवेसा

''त ३ इतियो ज ३

१२

अर्धं यंतो द्वक्तितो भविता अर्धधातुकस्येट् पाययति शाद्धासः इत्यादिना युक्त ओलीप ×

मानाधिकरण्येनैवसंबध्यते नवैयधिकरण्येन तेनह्रस्वो नपुंसके इत्यत्र येनेति तदंतलाभादजंतप्रातिप
दिकस्यैवह्रस्वः श्रीयं नेह स्नवाक् ब्राह्मणकुलं शमामष्टानां दीर्घ इत्यत्र तु सामानाधिकरण्यासंभवाच्छमादी
नामवइतिसंबध्यते तेनशाम्यतीत्यादि सिद्धं वाक्यस्यटेः प्लुतः इत्यत्र सामानाधिकरण्यसंभवेपि टेर्ग्रहणसा
मर्थ्याद्वाक्यटेरवयवस्याच्प्लुत इति व्याख्यायते अन्यथा अग्नीत्स्याचश्चेति परिभाषया मामे हि हिस्मेत्यादि वा
क्यांतस्याचप्लुत सिद्धौ किमनेन टेर्ग्रहणेन तेनाग्निमानेध्रीद्रवर्मन् इत्यादि सिध्यतीति दिक् पुरस्तादपवादन्याये
नस्थानेयोगत्वस्यापवादः प्रत्ययः परश्चेत्यनेन तु परत्वादयं बाध्यते तेनचरेष्टः गायोष्टक् इत्यादयः पराएवभ
वंति मिदचोंत्यात्परः स्थानेयोगत्वस्य परश्चेतिपरत्वस्यचापवादः यशांसि वनानि नपुंसकस्य झलचइति नुम्
रुणद्धि रुधादिभ्यश्नम् ननुपूर्वयोगावदनमपि पुरस्तादपवादन्यायेनस्थानेयोगमात्रस्यापवादोऽस्तु लिखि
तबाध्यसामान्यचिंतामाश्रित्य स्वविषये प्रसक्तं सर्वं बाध्यते इतीहाप्यभ्युपगमात् अन्यथा श्नमोमित्करणंव्य
र्थं स्यात् नचश्नवर्णार्थं एवमकारः स्यादिति वाच्यं तृणहमिति निर्देशात् अचां मध्ये इति सूत्रे जात्यभिप्रायेणेव इ
मि २ त्येकवचनमिति भावः अचां मध्ये इति किम् मुंचति लुंपति अंत्यात् इवः परो मित्स्यादिति प्राचां व्याख्यानेन तु सिध्य
ति शमुचादीनामित्यत्रांत्यस्याचोऽसंभवेन मित्परिभाषया अनुपस्थितिप्रसंगात् अंत्यात्वचोत्यात्परो मित्स्यादि

१२ तिव्यत्यासेन योजयित्वा प्राचीनमप्रमाणमपि कथंचित्समर्थयंते सूर्वसूत्रादेतदनुवर्त्तते एकदेशस्वरितत्वप्रति।
ज्ञानादतो व्याचष्टे अत्रावपवदति तेन वारिणीत्यादावंगस्य नांतत्वेन दीर्घः सिद्धः परादित्वे सन्नसिध्येत् अथ
कत्वेतुवहं लिहदत्यत्र वहाग्रे लिहइति खशिग्रुरु द्विषदिति सुमिमोनुस्वारो नस्याद्दपदांतत्वादिति भा
वः यत्तुकेचिद्दुक्ते अभक्तत्वे वारिणीतिदीर्घो नस्यादिति तत्तदादिग्रहणं स्यादि नुमर्थमित्यंगसंज्ञासूत्र।
स्थवार्त्तिके नैव दूषितप्रायं षष्ठीस्थानेयोगा स्थानेनयोगोऽस्याइति विग्रहः निपातनादेत्वं षष्ठ्याः संबंधमात्रबो
धित्वेपीहशास्त्रेयाषष्ठी सा स्थानेयोगा बोध्या किमविशेषेणेत्याह अत्र निर्द्धारितसंबंधविशेषेति अत्र निर्द्धारि
उ.त.२ तेति किं उपध्याया गोहः शासइदङ्हलोरित्यादावुपधासन्निधानेनावयवषष्ठीत्वनिर्णीतेगोहः शासइत्या
दौ माभूत् सतिहितत्रापि स्थानेयोगत्वेगोहिशासिस्थानेधातुमात्रस्योपधायाश्चस्थानेऊदितौ स्यातामिति।
दिक स्थानेनचप्रसंगइति न च स्यप्रसंगार्थकत्वे विवदितं वर्णानां स्थानेशोरे: प्रसक्तिः तत्रमित्यौके दर्भाणा
प्रसंगइतिप्रतीते एवं च कोपणंवीत्यादावित्युच्चारणप्रसक्तौ यणुच्चारणीयइत्यायमर्थः संपद्यते स्थानेसद्दसतम
अर्थात्प्राप्यमाणानां मध्ये एव अत्र तत्र एव गंगोदकमित्यत्र त्रिमात्र ओकारो न इह स्थाने दत्तनुवर्त्तमाने पुन
स्थानेग्रहणं दृष्टेऽपि वाक्यार्थः संपत्तः तात्वादिरूप स्थानेयोऽन्तरतमस्तत्स्य युक्तो न तर्य वानितियावत् सप्रा
प्यमाणानां मध्ये स्यादिति तदेतदाह यत्रानेकविधमिति स्थानार्थगुणप्रमाणतश्चतुर्विधमित्यर्थः स्थान १२

स्प ३ ६।२

